# षोडशः पाठः

# परिव्राजकप्रसादः

संस्कृतसाहित्यस्य प्राचीनतमा आख्यायिका हर्षचरितनाम्नी अस्ति । गद्यस्य भेदद्वयं भवति कथा आख्यायिका च । आख्यायिकायाः कथावस्तु वास्तविकं भवति । कथायाः इतिवृत्तं कविकल्पितं भवति । लाघवं समासबहुलतया संस्कृतगद्यस्य वैशिष्ट्यं भवति । हर्षचरितस्य लेखकः बाणभट्टः अस्ति । बाणभट्टस्य एका अन्या रचना 'कादम्बरी' इति नाम्नी अस्ति । कादम्बरी बाणभट्टानुसारं 'अतिद्वयी कथा' अस्ति । हर्षचरितम् अष्टोच्छ्वासात्मकमस्ति । प्रथमोच्छ्वासे प्रारम्भे एकविंशतिश्लोकेषु मङ्गलाचरणानन्तरं पूर्वकवीनां ग्रन्थानाञ्च वर्णनमस्ति । अस्याम् आख्यायिकायां राज्ञः हर्षस्य इतिहाससम्मतं जीवनवृत्तं काव्यशैल्यां वर्णितमस्ति । बाणभट्टः सप्तम्यां शताब्द्याम् अजायत । अधोलिखितोऽशः हर्षचरितात् गृहीतः । अत्र स्थाणीश्वरः पुष्पभूतिः भैरवाचार्यस्य शिष्यं सभायां सम्मानयति ।

अस्ति पुण्यकृतामधिवासः, वासवावास इव वसुधामवतीर्णः शशिकरावदातवृत्तमुक्ताफलरिव गुणिभिः प्रसाधितः श्रीकण्ठो नाम जनपदः ॥

तत्र च एकदेश इव सुरराज्यस्य, प्रथमोऽवतार इव ब्रह्मलोकस्य, प्रतिनिधिरिव चन्द्रलोकस्य, नामाभिहार इव कुबेरनगरस्य, स्थाणीश्वराख्यो जनपदविशेषः ॥

यः, तपोवनमिति मुनिभिः, यमनगरमिति शत्रुभिः चिन्तामणिरिति अर्थिभिः, गुरुकुलमिति विद्यार्थिभिः, वसुधारेति विप्रैः अगृह्यत ॥

तत्र च साक्षात्सहस्राक्ष इव सर्ववर्णधरं धनुर्दधानः, जलनिविमय इव मर्यादायाम्, शशिमय इव कलासंग्रहे, गुरुर्वचसि, पृथुरुरसि, विशालो मनसि, जनकस्तपसि, बुधः सदसि, अर्जुनो यशसि, भीष्मो धनुषि, राजा पुष्पभूतिरिति नाम्ना बभूव ॥

तस्य च शैशवादारभ्य अन्यदेवताविमुखी भगवति भक्तिसुलभे भवे भूर्यसी भक्तिरभूत् । अकृतवृषभध्वजपूजाविधिर्न स्वप्नेऽप्याहारमकरोत् । अजम् अजरम् अमरगुरुम् असुरपुररिपुं पशुपतिं प्रपन्नः अन्यदेवताशून्यममन्यत त्रैलोक्यम् ॥

तथा च परममाहेश्वरः स भूपालः, लोकतः शुश्राव भगवन्तं दाक्षिणात्यं भैरवाचार्यनामानं महाशैवम् । आचकाङ्क्ष च सर्वथाप्यस्य दर्शनम् ।

अथ कदाचित्पर्यस्ते वासरे, अन्तःपुरवर्तिनं राजानमुपसृत्य प्रतीहारी विज्ञापितवती-''देव, द्वारि परिव्राट् आस्ते । कथयति च-भैरवाचार्यवचनाद्देवमनुप्राप्तोऽस्मि इति'' इति ॥

राजा तु तच्छ्रुत्वा सादरम् ‘‘कासौ ! आनयात्रैव। प्रवेशयैनम्’’ इत्यब्रवीत्। तथा चाकरोत्प्रतीहारी ॥

न चिराच्च प्रविशन्तं प्रांशुम् आजानुभुजं भैक्षक्षाम पृथूतमाङ्गम्, ईषदावक्रघोणम्, अंसावलम्बिना योगपट्टकेन विरचिनवैकक्षकम्, धातुरसारुणेन कर्पटेन कतोत्तरासङ्गं मस्करिणम् अद्राक्षीत् ॥ राजा क्षितिपतिरप्युपगतमुचितेन चैनमादरेणाग्रहीत्। आसीनं च प्रपृच्छ-‘‘क भैरवाचार्यः’’ इति। सादरेण नरपतिवचनेन मुदितमनास्तु परिवाट्, तम् उपनगरं सरस्वतीतटवनावलम्बिनि शून्यायतने स्थितमाचचक्षे। भूयश्चबभाषे-‘‘अर्चयति महाभागे भगवानाशीर्वचसा’’ इत्युक्त्वा च उपनिन्ये भैरवाचार्यप्रहितानि रत्नवन्ति पञ्च राजतानि पुण्डरीकाणि ॥

## शब्दार्थः

| | | |
|---|---|---|
| पुण्यकृतामधिवासः | - | देवानां निवासः |
| वासवावास इव | - | इन्द्रस्य निवासः इव |
| शशिकरावदातवृत्तै | - | चन्द्रकिरणतुल्यस्वच्छचरितैः |
| मुक्ताफलैरिव | - | मौक्तिकतुल्यैः |
| अर्थिभिः | - | याचकैः |
| वसुधारा | - | धनस्य प्रवाहः |
| सहस्राक्षः | - | इन्द्रः |
| जलनिधिः | - | समुद्रः |
| भवे | - | शिवे |
| भूयसि | - | अधिके |
| वृषभध्वजः | - | शंकरः |
| अमन्यत | - | स्वीकृतवान् |
| आचकाङक्ष | - | काङ्क्षितवान् |
| पर्यस्तेवासरे | - | दिनावसाने |
| प्रतीहारी | - | द्वारपालिका |
| परिव्राट् | - | संन्यासी |
| न चिराच्च | - | शीघ्रम् |
| प्रांशुम् | - | दीर्घम् |
| आजानुभुजं | - | आजानुबाहुम् |
| भैक्षक्षामं | - | भिक्षाटनात् दुर्बलम् |

| | | |
|---|---|---|
| ईषदावक्रधोणम् | - | किञ्चिद्वक्रनासिकम् |
| अंसावलालम्बिना योगपट्टकेन | - | स्कन्धाश्रितप्रावारकेण |
| कर्पटेन | - | वस्त्रेण |
| मस्करिणम् | - | संन्यासिनम् |
| क्षितिपतिः | - | भूपतिः |
| मुदितमना | - | प्रसन्नचित्तः |
| उपनिन्ये | - | दन्तवान् |
| भैरवाचार्यप्रहितानि | - | भैरवाचार्यप्रेषितानि |
| प्रिय जनप्रणयभङ्गकातरः | - | इष्टजनप्रेमभङ्गभीतः |
| दाक्षिण्यं | - | दानशीलता |
| दोलायमानेन | - | आन्दोलनरतेन |
| जग्राह | - | गृहीतवान् |

## अभ्यासः

1. **एकपदेन उत्तरं लिखत-**

क. जनपदस्य नाम किम् ?

ख. जनपदस्य नृपस्य नाम किम् ?

ग. नृपः कस्य भक्तः ?

घ. महाशैवस्य नाम किम् ?

ङ. परिव्राट् किं दत्तवान् ?

2. **एकवाक्येन उत्तरं लिखत-**

क. प्रतीहारी किं विज्ञापितवती ?

ख. परिव्राजेन किं दत्तम् ?

ग. नृपः कीदृशः आसीत् ?

घ. नृपः कदा आहारं करोति स्म ?

ङ. कः जनपदविशेषः ब्रह्मलोकस्य प्रथमोऽवतार इवास्ति ?

3. **त्रिंशत पदैः उत्तरं लिखत-**

क. श्रीकण्ठजनपदस्य वर्णनं कुरुत।

ख. राज्ञः गुणान् वर्णयत।

ग. नृपस्य शिवभक्तेः वर्णनं कुरुत।

घ. परिव्राजः वेशभूषां वर्णयत।

4. **सन्धिविच्छेदं कुरुत-**

प्रथमोऽवतारः

वासवावासः

प्रतिनिधिरिव

गुरोर्वचसि

जनकस्तपसि

5. **धातुलकारवचनानि लिखत-**

| पदानि | धातुः | लकारः | वचनम् |
|---|---|---|---|
| अगृह्यत् | | | |
| बभूव | | | |
| अकरोत् | | | |
| अमन्यत | | | |
| अभूत् | | | |

6. **विभक्तिवचने लिखत-**

अर्थिभिः

मनसि

नाम्ना

वासरे

द्वारि

7. **रिक्तस्थानं समुचितपदेन पूरयत-**

क. देव, द्वारि परिव्राट्.................... । (शेते/आस्ते)

ख. आचकाङ्क्ष च सर्वथाप्यस्य .................. । (अदर्शनम्/दर्शनम्)

ग. लोकतः शुश्राव भगवन्तं दाक्षिणात्यं भैरवाचार्यनामानं .................... । (महावैष्णवम्/महाशैवम्)

घ. अकृतवृषभध्वजपूजाविधिर्न स्वप्नेऽप्याहारम् ............... । (करोत्/अकरोत्)

ङ. राजा .................... इति नाम्ना बभूव। (पुष्पभूतिः/वसुमतिः)

## 8. मेलनं कुरुत-

| (अ) | (ब) |
|---|---|
| जनपद: | मनसा |
| पुष्पभूति: | महाशैव: |
| नृप: | शिवभक्त: |
| भैरवाचार्य: | नृप: |
| दोलायमानेन | श्रीकण्ठ: |

## 9. रेखाङ्कितानां शब्दानां प्रश्नरचनां कुरुत-

क. अस्ति श्रीकण्ठो नाम जनपद: ।

ख. श्रीकण्ठजनपदे राजा पुष्पभूतिरिति नाम्ना बभूव ।

ग. भैरवाचार्यस्य दर्शनम् आचकाङ्क्ष ।

घ. भैरवाचार्येण पञ्चरत्नानि समर्पितानि ।

ङ. भैरवाचार्यनामा महाशैव: आसीत् ।

## 10. अधोलिखितानां समस्तपदानां विग्रहं कुरुत-

वासवावास:

यमनगरम्

पशुपति:

क्षितिपति:

भूपाल:

## योग्यताविस्तार:-

- पाठे आगतानि सर्वनामपदानि सङ्कलनीयानि ।
- संस्कृतगद्यकवीनां सूची निर्मातव्या ।
- संस्कृतगद्यकाव्यानां सूची निर्मातव्या ।
- बाणभट्टस्य कादम्बरीविषयकं ज्ञानं वर्धयतु ।
- गद्यस्य क्रमिकविकास: प्राप्नुयात् ।

❖ ❖ ❖

## सप्तदशः पाठः

# अन्योक्तयः

पण्डितराज जगन्नाथः संस्कृतसाहित्यस्य परवर्तिकालिकः कविः आचार्यश्चास्ति एषः ईसवीयसप्तदशशताब्द्याम् अभवत् अनेन विरचितानि गङ्गालहरीयमुनालहरी प्रभृतिकाव्यानि प्रसिद्धानि सन्ति। 'रसगङ्गाधरः' इत्याख्यः ग्रन्थः जगन्नाथस्य प्रसिद्धः काव्यशास्त्रनिबन्धः। अस्य स्फुटपद्यानां सङ्ग्रहः वर्तते भामिनीविलासकाव्यम्। अत्र भामिनीविलासकाव्यस्य अन्योक्ति विलासात् कमनीयानि पद्यानि सङ्कलितानि। अन्योक्तिपद्यमाध्यमेन प्रबोधनं प्रभाविरूपेण भवति। अतः एषा काव्यविधा लोकप्रिया अस्ति।

*पृष्टाः खलु परपुष्टाः परितो दृष्टाश्च विटपिनः सर्वे।*
*माकन्द न प्रपेदे मधुपेन तवोपमा जगति॥ 1॥*

**अन्वयः -** माकन्दः मधुपेन खलु परपुष्टाः परितः च सर्वे विटपिनः दृष्टाः (किन्तु) जगति तव उपमा न प्रपेदे।

**शब्दार्थः -**

| | | |
|---|---|---|
| माकन्दः | - | आम्रम् |
| मधुपः | - | भ्रमरः |
| परपुष्टाः | - | कोकिलाः |
| विटपिनः | - | वृक्षाः |
| प्रपेदे | - | लब्धवान् |

*आरामाधिपतिर्विवेकविकलो नूनं रसा नीरसा,*
*वात्याभिः परुषीकृता दश दिशश्चण्डातपो दुःसहः।*
*एवंधन्वति चम्पकस्य सकले संहारहेतावपि,*
*त्वं सिञ्चन्नमृतेन तोयद कुतोऽप्याविष्कृतो वेधसा॥ 2॥*

**अन्वयः -** तोयद! आरामाधिपतिः विवेकविकलः नूनं रसा नीरसा, दश दिशः वात्याभिः परुषीकृताः चण्डातपः दुःसहः एवं धन्वति चम्पकस्य सकले संहारहेतौ अपि वेधसा अमृतेन सिञ्चन् त्वं कुतोऽपि आविष्कृतः।

**शब्दार्थः -**

| | | |
|---|---|---|
| हे तोयदः | - | हे जलद |
| विवेकविकलः | - | विचारहीनः |
| दिशः | - | ककुभः |

| | | |
|---|---|---|
| वात्याभिः | - | चक्रवातैः |
| धन्वति | - | मरुदेशे |
| वेधसा | - | ब्रह्मणा |

*दवदहनजटा ज्वाल जालाहतानां,*
*परिगलितलतानां म्लायतां भूरुहाणाम् ।*
*अयि जलधर शैलश्रेणिश्रृङ्गेषु तोयं,*
*वितरसि बहु कोऽयं श्रीमदस्तावकीनः ॥ 3 ॥*

**अन्वयः -** अयि जलधर ! दवदहनजटाज्वालजालाहतानां परिगलितलतानां म्लायताम् अपि भूरुहाणां शैलं श्रेणिशृङ्गेषु बहु तोयं वितरसि, अयं कः तावकीनः श्रीमदः ?

**शब्दार्थः -**

| | | |
|---|---|---|
| दवः | - | वनम् |
| जलधरः | - | मेघः |
| भूरुहाणां | - | वृक्षाणां |

*नापेक्षा न च दाक्षिण्यं न प्रीतिर्न च सङ्गतिः ।*
*तथापि हरते तापं लोकानामुन्नतो घनः ॥ 4 ॥*

**अन्वयः -** न अपेक्षा, न च दाक्षिण्यं, न प्रीतिः, न च सङ्गतिः, तथापि उन्नतः घनः लोकानां तापं हरते ।

**शब्दार्थः -**

| | | |
|---|---|---|
| दाक्षिण्यम् | - | नैपुण्यम् |

*समुत्पत्तिः स्वच्छे सरसि हरिहस्ते निवसनं,*
*निवासः पद्मायाः सुरहृदयहारी परिमलः ।*
*गुणैरेतैरन्यैरपि च ललितस्याम्बुज तव,*
*द्विजोत्तंसे हंसे यदि रतिरतीवोन्नतिरियम् ॥ 5 ॥*

**अन्वयः -** अम्बुज ! स्वच्छे सरसि समुत्पत्तिः हरिहस्ते निवसनः पद्मायाः निवासः परिमलः सुरहृदयहारी एतैः अन्यैः अपि च गुणैः ललितस्य तव द्विजोत्तं से हंसे यदि रतिः इयम् अतीव उन्नतिः ।

**शब्दार्थः -**

| | | |
|---|---|---|
| अम्बुजः | - | मेघः |

*किं खलु रत्नैरेतैः किम्पुनरभ्रायितेन वपुषा ते ।*
*सलिलमपि यन्न तावकमर्णव वदनम्प्रयाति तृषितानाम् ॥ 6 ॥*

**अन्वयः -** अर्णव ! ते एतैः रत्नैः किं खलु ? पुनः अभ्रायितेन वपुषा किं ? यत् तावकं सलिलम् अपि तृषितानां वदनं न प्रयाति। अर्णव ! यत् तावकं सलिलं तृषितानां वदनं अपि न प्रयाति, ते एतैः रत्नैः खलु ? पुनः अभ्रायितेन वपुषा किम् ?

**शब्दार्थः -**

| | | |
|---|---|---|
| अभ्रायितेन | - | जलपूर्णेन |
| न प्रयाति | - | न गच्छति |

*भुक्ता मृणालपटली भवता निपीता,*
*न्यम्बूनि यत्र नलिनानि निषेवितानि ।*
*रे राजहंस वद तस्य सरोवरस्य,*
*कृत्येन केन भवितासि कृतोपकारः ॥ 7 ॥*

**अन्वयः** - रे राजहंस ! वद, यत्र भवता मृणालपटली भुक्ता, अम्बूनि निपीतानि, नलिनानि निषेवितानि तस्य सरोवरस्य केन कृत्येन कृतोपकारः भवितासि ?

**शब्दार्थः** -

| | | |
|---|---|---|
| सरोवरस्य | - | तडागस्य |
| अम्बूनि | - | आपः |

*एणीगणेषु गुरुगर्वनिमीलिताक्षः,*
*किं कृष्णसार ! खलु खेलसि काननेऽस्मिन् ।*
*सीमामिमां कलय भिन्नकरीन्द्रकुम्भ,*
*मुक्तामयीं हरिविहारवसुन्धरायाः ॥ 8 ॥*

**अन्वयः** - कृष्णसार ! अस्मिन् कानने गुरुगर्वनिमीलिताक्षः एणीगणेषु किं खेलसि ? इमां हरिविहारवसुन्धरायाः भिन्नकरीन्द्रकुम्भ मुक्तामयीं सीमां कलय ।

**शब्दार्थः** -

| | | |
|---|---|---|
| गुरुगर्वनिमीलताक्षः | - | महता गर्वेण निमीलितनेत्रः |
| एणीगणेषु | - | मृगीसमूहेषु |
| कलय | - | अवलम्बय |

## अभ्यासः

**1. एकपदेन उत्तरं लिखत-**

क. कस्य उपमा न प्रपेदे ?

ख. विवेकविकलः कः आसीत् ?

ग. जलधरः कुत्र तोयं वितरति ?

घ. सुगन्धः कस्याः अस्ति ?

ङ. समुद्रस्य वपुः कीदृगस्ति ?

च. राजहंसः कस्य कृत्येन उपकृतः अस्ति ?

**2. एकवाक्येन उत्तरं लिखत-**

क. कीदृश: चण्डातप: दु:सह: ?

ख. मेघ: तापं कथं हरति ?

ग. पद्माया: निवास: कुत्र कुत्र अस्ति ?

घ. कृष्णसार: कुत्र खेलति ?

ङ. प्रथमश्लोक: कं सम्बोध्य उक्त: ?

**3. नामोल्लेखपुरस्सर सन्धिविच्छेदं कुरुत-**

क. तवोपमा

ख. अधिपतिर्विवेकविकल:

ग. दिशश्चण्ड:

घ. हेतावपि

ङ. कुतोऽपि

च. यन्न

छ. निपीतान्यम्बूनि

ज. कृतोपकार:

**4. नामोल्लेखपुरस्सरं समासविग्रहं लिखत-**

क. मृणालपटली

ख. विवेकविकल:

ग. ज्वालजालाहतानाम्

घ. परिगलितलतानाम्

ङ. राजहंस:

**5. त्रिभि:चतुर्भि: वा वाक्यै: उत्तरत-**

क. अम्बुजाया: गुणा: के ?

ख. षष्ठश्लोकस्थाया: अन्योक्ते: का शिक्षा ?

ग. राजहंसाय सरोवर: किं किं प्रादात् ?

घ.  कृष्णसार: कीदृशे कानने खेलति ?

ङ.  चम्पकस्य के संहारहेतव: कथिता: ?

### 6. अन्वयं लिखत -

क.  पृष्टा: ....................... जगति।

ख.  नापेक्षा ................. धन:।

ग.  किं खलु ................. तृषितानाम्।

घ.  समुत्पत्ति: .................... इयम्।

ङ.  दवदहन .................... श्रीमदस्तावकीन:।

### 7. निर्देशानुसारं विभक्तिपरिवर्तनं कुरुत-

| | | | | |
|---|---|---|---|---|
| क. | जगति | - | ............ | (षष्ठी द्विवचने) |
| ख. | वात्याभि: | - | ............ | (द्वितीया बहुवचने) |
| ग. | जलधर | - | ............ | (सप्तमी बहुवचने) |
| घ. | सरसि | - | ............ | (प्रथमा एकवचने) |
| ङ. | पद्माया: | - | ............ | (तृतीया बहुवचने) |
| च. | रत्नै: | - | ............ | (षष्ठी बहुवचनम्) |
| छ. | वपुषा | - | ............ | (द्वितीया एकवचने) |

### 8. अधोदत्तशब्दानां वाक्ये प्रयोगं कुरुत-

क.  मधुप:  ...................................

ख.  तोयद:  ...................................

ग.  जलधर:  ...................................

घ.  मेघ:  ...................................

ङ.  पद्मा  ...................................

च.  हंस:  ...................................

### 9. धातुलकार-वचनञ्च लिखत-

क.  सिञ्चति

ख.  वितरसि

ग. हरते

घ. प्रयाति

ङ. भवितासि

च. वद

छ. खेलसि

**10. अधोलिखितान् श्लोकान् पूरयत-**

क. नापेक्षा........................ धनः।

ख. एणीगणेषु ............... वसुन्धरायाः।

ग. आरामाधिपतिः ............... वेधसा।

घ. भुक्ता ................ कृतोपकारः।

ङ. किं खलु ............. तृषितानाम्।

**योग्यताविस्तारः-**

- भामिनीविलासस्य अन्यानि अपि पद्यानि लिखत।
- जगन्नाथस्य अन्यकृतिभ्यः श्लोकान् परिचिनुत।
- दत्तानि पद्यानि कण्ठस्थीकुरुत।

❖ ❖ ❖

## अष्टादशः पाठः

# भोजप्रबन्धः

भोजप्रबन्धः बल्लालसेनस्य कवेः कथाकाव्यम् अस्ति । अस्य रचनाकालः षोडशशताब्दी इतिहासविद्भिः निर्णीतः । धारानगर्याः अधिपतेः भोजस्य प्रशंसायां विरचितमिदं काव्यम् ऐतिहासिकं काव्यम् । अनेके कवयः भोजराजस्य सभायाम् आगत्य स्व स्व काव्यकौशलं प्रदर्शयन्तः, बहुमूल्यम् उपहारं, धनं च प्रतिगृह्णन्ति स्म । काव्येऽस्मिन् गद्यानि तु साधारणानि किन्तु पद्यानि उत्कृष्ट-काव्यस्योदाहरणानि सन्ति । प्रस्तुतकाव्यांशे प्रदर्शितं यत् धारानगर्यां कोऽपि अविद्वान् नासीत् । कुविन्दोऽपि तत्र रससिद्धः कविः । अतः गृहं याचमानस्य लक्ष्मीधरमहाकवेः निवासार्थं कुविन्दस्यापि गृहं दातुं भोजराजः न प्रभवति स्म । भोजराजः विद्वत्सेवी तथा स्वयं विद्वान् कविश्चासीत् । तेन महाकविः लक्ष्मीधरः, कुविन्दः, बाणादयः धनमानदानेन सत्कृताः । यद्यपि कुविन्दः राजानं भोजं त्वं कारेण वदति किन्तु तस्य स्पष्टवादित्वं स्वाभिमानवृत्तिं कवित्वं च विचार्य सः भोजराजेन सत्कृतः ।

ततस्तेन (लक्ष्मीधरेण) परिषच्चमत्कृता। राजा च तस्य प्रत्यक्षरं ददौ। पुनः कविराह-'देव' मया सकुटुम्बेनात्र निवासाशया समागतम् ।1।

*क्षमी दाता गुणग्राही स्वामी पुण्येन लभ्यते ।*
*अनुकूलः शुचिर्दक्षः कविर्विद्वान्सुदुर्लभः ॥*

इति ! ततो राजा मुख्यामात्यं प्राह-'अस्मै गृहं दीयताम्' इति। ततो निखिलमपि नगरं विलोक्य कमपि मूर्खममात्यो नापश्यत्, यं निरस्य विदुषे गृहं दीयते। तत्र सर्वत्र भ्रमन्कस्यचिन्कुविन्दस्य गृहं वीक्ष्य कुविन्दं प्राह-'कुविन्द, गृहान्निःसर। तव गृहं विद्वानेष्यति' इति। ततः कुविन्दो राजभवनमासाद्य राजानं प्रणम्य प्राह-'देव, भवदमात्यो मां मूर्खं कृत्वा गृहान्निःसारयति, त्वं तु पश्य (अहम्) मूर्खः पण्डितो वेति ॥ 2 ॥

*काव्यं करोमि नहि चारुतरं करोमि, यत्नात्करोमि यदि चारूतरं करोमि ।*
*भूपालमौलिमणिमण्डितपादपीठ, हे साहसाङ्क, कवयामि वयामि यामि ॥*

ततो राजा त्वंकारवादेन वदन्तं कुविन्दं प्राह-'ललिता ते पदपङ्क्तिः, कवितामाधुर्यं च शोभनम्, परन्तु कवित्वं विचार्य वक्तव्यम्' इति। ततः कुपितः कुविन्दः प्राह-'देव, अत्रोत्तरं भाति किन्तु न वदामि। राजधर्मः पृथग्विद्वद्मतिः' इति। राजा प्राह-'अस्ति चेदुत्तरं ब्रूहि'

इति। कुविन्दः प्राह-'देव, कालिदासादृतेऽन्यं कविं न मन्ये। कोऽस्ति ते सभायां कालिदासादृते कवितातत्त्वविद्विद्वान्?

*अयं ये वाग्गुम्फो विशदपदवैदग्ध्यमधुरः।*

*स्फुरद्बन्धो वन्ध्यः परहृदि कृतार्थः कविहृदि।*

*कटाक्षो वामाक्ष्या दरदलितनेत्रान्तगलितः,*

*कुमारे निःसारः स तु किमपि यूनः सुखयति' ॥*

ततो राजा 'साधु भोः कुविन्द' इत्युक्त्वा प्रत्यक्षरलक्षं ददौ। एवं क्रमेणातिक्रान्ते कियत्यपि काले बाणः पण्डितवरः परं राजा मान्यमानोऽपि प्राक्तनकर्मतो दारिद्र्यमनुभवति। एवं स्थिते नृपतिः कदाचिद्रात्रावेकाकी प्रच्छन्नवेषः स्वपुरे चरन् बाणगृहमेत्यातिष्ठत्। तदा निशीथे वाणो दरिद्र्याकुलतया कान्तां वक्ति-'देवि, राजा कियद्वारं मम मनोरथमपूरयत्। अद्यापि पुनः प्रार्थितो ददात्येव। परन्तु निरन्तरप्रार्थनारसे मूर्खस्थापि जिह्वा जडीभवति।' इत्युक्त्वा मुहूर्तार्थं मौनेन स्थितः। पुनः पठति-

*'हर हर पुरहर पुरुषं क्व हलाहलफल्गुचाचनावचसोः।*

*एकैव तव रसज्ञा तदुभयरसतारतम्यज्ञा ॥*

देवि,

*दारिद्र्यस्यापरा मूर्तियाञ्चा न द्रविणाल्पता।*

*अपि कौपीनवाञ्छंभुस्तथापि परमेश्वरः ॥*

तत्सत्यपि दारिद्र्ये राज्ञे वक्तुं मया स्वयमशक्यम्। किंच देवि, वैश्वदेवावसरे प्राप्ताः क्षुधार्ताः पश्चाद्यान्तीति तदेव मे हृदयं दुनोति। ततो राजा बाणाय रुप्यकाणां पञ्चदशलक्षाणि प्रादात्।

## शब्दार्थः

| | | |
|---|---|---|
| प्रत्यक्षरम् | - | एकम् एकम् अक्षरम् प्रति |
| आमात्यम् | - | मन्त्रिणम् |
| निरस्य | - | उत्खात्य |
| कुविन्दः | - | वस्त्रनिर्माता |
| आसाद्य | - | प्राप्य |
| मौलिः | - | शिरः |
| मंडितः | - | अलंकृतः |

| | | |
|---|---|---|
| पादपीठ: | - | चरणपीठ: |
| वयामि | - | वस्त्रं रचयामि |
| यामि | - | गच्छामि |
| त्वंकारवादेन | - | त्वम् इति कथनेन |
| भाति | - | प्रतीयते |
| तत्त्वविद् | - | तत्त्वज्ञाता |
| वाग्गुम्फ: | - | वाण्या: गुम्फ: |
| वैदग्ध्यम् | - | पाण्डित्यम् |
| विशदम् | - | प्रसादगुणयुक्तं सुस्पष्टम् |
| स्फुरद्बन्ध: | - | प्रसन्नपदप्रयोग: |
| वन्ध्य: | - | निरर्थक: |
| परहृदि | - | सहृदयहृदि |
| दर-दलित | - | किञ्चित्स्फुरित |
| गलित: | - | नि:सृत: |
| प्राक्तनं | - | प्राचीनम् |
| प्रच्छन्नं | - | गुप्तम् |
| निशीथे | - | अर्धरात्रि: |
| कियद्वारम् | - | अनेकबारम् |
| कान्ताम् | - | प्रियपत्नीम् |
| एत्य | - | प्राप्य |
| परुषम् | - | कठिनं |
| हलाहलं | - | विषम् |
| फल्गु | - | निस्सारं |
| तारतम्यज्ञा | - | न्यूनाधिकज्ञा |
| द्रविणम् | - | धनम् |
| याञ्चा | - | याचना |
| कोपीनवान् | - | कौपीनवस्त्रयुक्त: |
| वैश्वदेव | - | यज्ञविशेष: |
| एक्म | - | स्वर्णमुद्रा |

## अभ्यासः

1. **एकपदेन उत्तरं लिखत-**

क. केन परिषच्चमत्कृता ?

ख. अमात्यः निखिलम् अपिनगरं विलोक्य कं नापश्यत् ?

ग. अमात्यः मूर्खं कृत्वा गृहात् कं निस्सारयति ?

घ. कुविन्दः कस्माद्दतेऽन्यं कविं न मन्यते ?

ङ. दारिद्र्यस्य अपरा मूर्तिः का ?

2. **एकवाक्येन उत्तरं लिखत-**

क. राजा मुख्यामात्यं किं प्राह ?

ख. अमात्यः कुविन्दं किं प्राह ?

ग. कुपितः कुविन्दः राजानं किम्प्राह ?

घ. प्रच्छन्नवेशः राजा रात्रौ चरन् स्वपुरे कुत्रातिष्ठत् ?

ङ. मूर्खस्यापि जिह्वा कदा जडीभवति ?

3. **कान्तां प्रति बाणस्य कवेः उत्तरं त्रिंशत्पदैः लेखनीयम् ।**

4. **निम्नांकितस्य श्लोकस्य अन्वयं लिखत-**

दारिद्र्यस्यापरा मूर्तिर्याञ्चां न द्रविणाल्पता,

अपि कौपीनवाञ्छंमुस्तथापि परमेश्वरः ?

5. **कोष्ठात् उचितं पदं चित्वा रिक्तस्थानं पूरयत-**

(गृहं, नगरम्, नापश्यत्, निरस्य, सर्वत्र, कुविन्दं, विद्वान्)

राजामुख्यामात्यं प्राह-'अस्मै....... दीयताम्' इति। ततो निखिलमपि........ विलोक्य कमपि मूर्खममात्यो.......... , यं ............. विदुषे गृहं दीयते/तत्र............ भ्रमन्, कस्यचिद् कुविन्दस्य गृहं वीक्ष्य.......... प्राह कुविन्द गृहान्निः सर। तवगृहं ........ एष्यति इति।

6. **कथायाः तृतीयम् अनुच्छेदं पठित्वा वाक्यानां पुरतः क्रमसंख्या लिख्यताम्:-**

क. कोऽस्ति ते सभायां कालिदासाद्दते कवितातत्त्वविद् विद्वान् -

ख. ततो राजा त्वंकारवादेन वदन्तं कुविन्दं प्राह-

ग. कुविन्दः प्राह-'देव, कालिदासाद्दतेऽन्यं कविं न मन्ये-

घ. ललिता ते पदपंक्तिः कवितामाधुरी च शोभनं परन्तु कवित्वं विचार्य वक्तव्यम् इति -

ङ. राजा प्राह-अस्ति चेत् उत्तरं ब्रूहि इति-

च. ततः कुपितः कुविन्दः प्रहा-देव अत्रोत्तरं भाति किन्तु न वदामि-

छ. राजधर्मः पृथग् विद्वद्धर्माद् इति-

**7. उचितं संयोजनं क्रियताम्-**

| | क | ख |
|---|---|---|
| क. | तत्र सर्वत्र कस्यचित् कुविन्दस्य | वदन्तं कुविन्दं प्राह, |
| ख. | देवभवदमात्यो मां मूर्खं कृत्वा | स्वपुरेचरन् बाणगृहमेत्यातिष्ठत्, |
| ग. | ततो राजा त्वंकारवादेन | वक्तुं मया स्वयमशक्यम्। |
| घ. | नृपतिःकदाचिद्रात्रौ एकाकी पृच्छन्नवेषः | गृहं वीक्ष्य कुविन्दं प्राह। |
| ङ. | सत्यपि दारिद्रये राज्ञे | गृहान्निःसारयति। |

**8. सन्धिविच्छेदं कृत्वा नाम लिखत-**

| | | |
|---|---|---|
| परिषच्चमत्कृता, | गृहान्निःसर, | वेति, |
| पृथग्विद्वद्, | धर्मात्, | इत्युक्त्वा सत्यपि। |

**9. अधोदत्तेषु वाक्येषु कोष्ठके दत्तधातुभिः सह प्रत्ययं संयोज्य रिक्तस्थानपूर्तिः क्रियताम्-**

क. यं (निः+अस्)........... विदुषे गृहं दीयते।

ख. गृहं (वि+ईक्ष्)............. कुविन्दं प्राह।

ग. कुविन्दो राजभवनम् (आ+सद्) ........... राजान (प्र+नम्)........... प्राह।

घ. परन्तु कवित्वं (वि+चर्) ................ वक्तव्यम्।

**10. उदाहरणानुसारं समस्तपदैः वाक्यानि पूरयतः-**

यथा-अत्र (निवासस्य आशया) निवासाशया समागतम्।

क. मया (कुटुम्बेन+सह)................ निवासाशया समागतम्।

ख. क्षमी दाता (गुणानां+ग्राही)............. स्वामी पुण्येन लभ्यते।

ग. कुविन्दो (राज्ञः+भवनम्)............. आसाद्य राजानं प्राह।

घ. ततो राजा (त्वंकारस्य+वादेन) ............... वदन्तं कुविन्दं प्राह।

ङ. स्फुरद्बन्धोवन्ध्यः (परेषांहृदि)................... कृतार्थः कावेहृदि।

**योग्यताविस्तारः-**

- भोजस्यविषये अन्याः कथाः अन्विष्य लिखत पठत च।

❖ ❖ ❖

## नवदशः पाठः

# सुभाषितानि

सुभाषितानि संस्कृतसाहित्यस्य अमूल्यरत्नानि कालातीतानि सन्ति, विश्वभाषासु यदि अनुदितानि भवन्ति तर्हि एतानि एव विश्वरत्नानि भवन्ति। संस्कृतसाहित्यकोशः एतादृशैः रत्नैः सुपूरितः शोभते। पाषाणरत्नं तु दुर्जनैः अपह्रियते, कालेन नश्यति च, किन्तु ज्ञानरत्नं न केवलं नित्यनूतनं भवति अपितु उत्तरोत्तरं उज्ज्वलतरं भवति, यतोहि विपत्तौ ज्ञानं मार्गं तानि दर्शयन्ति।

यथा -प्रेम पुरुषार्थो महान् अस्मिन् पाठे हितोपदेशादिभ्यः ग्रन्थेभ्यः दश श्लोकाः सञ्चिताः।

*सर्वे यत्र विनेतारः, सर्वे पण्डितमानिनः।*
*सर्वे महत्त्वमिच्छन्ति तद्वृन्दमवसीदति ॥ 1 ॥ हितोपदेशे*

**अन्वयः -** यत्र सर्वे विनेतारः सर्वे पण्डितमानिनः सर्वे महत्वम् इच्छन्ति तत् वृन्दम् अवसीदति।

**शब्दार्थः -**

| | | |
|---|---|---|
| विनेतारः | - | नायकाः |
| पण्डितमानिनः | - | पण्डितम्मन्यमानाः |
| वृन्दम् | - | समूहः |
| अवसीदति | - | दुःखीभवति |

*न त्वहं कामये राज्यं, न स्वर्गं नापुनर्भवम्।*
*कामये दुःखतप्तानां, प्राणिनामार्त्तिनाशनम् ॥ 2 ॥ श्रीमद्भागवते*

**अन्वयः -** अहं न राज्यं न स्वर्गं न पुनर्भवं तु दुःखतप्तानां प्राणिनाम् आर्तिनाशनं कामये।

**शब्दार्थः -**

| | | |
|---|---|---|
| कामये | - | इच्छामि |
| पुनर्भवम् | - | पुनर्जन्म |
| दुःखतप्तानां | - | पीडितानाम् |
| आर्तिनाशनम् | - | दुःखनाशनम् |

*अनुबन्धपरे जन्तौ, असंसक्तेन चेतसा,*
*भक्ते भक्तसमाचारः, शठे शठ इवा स्थितः ॥ 3 ॥ योगवाशिष्ठे*

**अन्वयः -** जन्तौ अनुबन्धपरे चेतसा असंसक्तेन भक्ते भक्तसमाचारः शठे शठ इव आस्थितः।

**शब्दार्थः -** जन्तौ - प्राणिनि

असंसक्तेन - आसक्तिरहितेन

चेतसा - मनसा

समाचारः - वार्ता

शठः - मूर्खः

***श्रूयतां धर्मसर्वस्वं, श्रुत्वा चैवावधार्यताम्,***

***आत्मनः प्रतिकूलानि, न परेषां समाचरेत् ॥ 4 ॥ महाभारते***

**अन्वयः -** श्रूयतां धर्मसर्वस्वं, श्रुत्वा च एव अवधार्यताम्, आत्मनः प्रतिकूलानि परेषां न समाचरेत्।

**शब्दार्थः -** अवधार्यताम् - धार्यताम्

प्रतिकूलानि - विपरीतानि

परेषाम् - अन्येषाम्

***अष्टादशपुराणेषु, व्यासस्य वचनद्वयम्,***

***परोपकारः पुण्याय पापाय परपीडनम् ॥ 5 ॥ महाभारते***

**अन्वयः -** अष्टादशपुराणेषु व्यासस्य वचनद्वयम्-परोपकारः पुण्याय, परपीडनम् पापाय।

**शब्दार्थः -** परपीडनम् - परदुःखम्

***न सा सभा यत्र न सन्ति वृद्धा, वृद्धा न ते ये न वदन्ति धर्मम्।***

***धर्मः स नो यत्र न सत्यमस्ति, सत्यं न तद् यच्छलेनानुविद्धम् ॥ 6 ॥ रामायणे***

**अन्वयः -** यत्र वृद्धाः न सन्ति सा सभा न, ये धर्मं न वदन्ति ते वृद्धाः न, यत्र सत्यं न अस्ति सः धर्मः न, यत् धर्मेण अनुविद्धं तत् सत्यं न।

**शब्दार्थः -** छलेन - कपटेन

अनुविद्धम् - रूद्धम्

***बोद्धारः मत्सरग्रस्ताः, प्रभवः स्मयदूषिताः।***

***अबोधोऽपहताश्चान्ये, जीर्णमङ्गे सुभाषितम् ॥ 7 ॥ वैराग्यशतके***

**अन्वयः -** (यदा) बोद्धारः मत्सरग्रस्ताः प्रभवः स्मयदूषिताः अन्ये च अबोधोऽपहताः (तदा) सुभाषितम् अङ्गे जीर्णम्।

**शब्दार्थः -** बोद्धारः - ज्ञानिनः

मत्सरग्रस्ताः - ईर्ष्याग्रस्ताः

स्मयः - अभिमानः

उपहताः - प्रतिहताः

*पृथिव्यां त्रीणि रत्नानि, जलमन्नं सुभाषितम् ।*
*मूढैः पाषाणखण्डेषु, रत्नसंज्ञा विधीयते ॥ 8 ॥ चाणक्यनीतौ*

**अन्वयः -** पृथिव्यां **त्रीणि** रत्नानि जलम् अन्नं सुभाषितम्, मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते।

**शब्दार्थः -**

| | | |
|---|---|---|
| पृथिव्यां | - | धरायाम् |
| मूढैः | - | मूर्खैः |

*अद्यापि दुर्निवारं स्तुतिकन्या वहति कौमारम् ।*
*सद्भ्यो न रोचते साऽसन्तस्तस्यै न रोचन्ते ॥ 9 ॥ राजतरङ्गिण्याम्*

**अन्वयः -** स्तुतिकन्या अद्यापि दुर्निवारं कौमारं वहति। (यतो हि) सा सद्भ्यो न रोचते असन्तः तस्यै न रोचन्ते।

**शब्दार्थः -**

| | | |
|---|---|---|
| दुर्निवारम् | - | अनिवार्यम् |
| सद्भ्यः | - | सज्जनेभ्यः |

*सुखमापतितं सेव्यं, दुःखमापतितं तथा ।*
*चक्रवत् परिवर्तन्ते, दुःखानि च सुखानि च ॥ 10 ॥ हितापदेशे*

**अन्वयः -** आपतितं, सुखम् तथा आपतितं दुःखं सेव्यम्। सुखानि च दुःखानि च चक्रवत् परिवर्तन्ते।

**शब्दार्थः -**

| | | |
|---|---|---|
| आपतितम् | - | आगतम् |
| चक्रवत् | - | चक्रक्रमानुसारम् |
| परिवर्तन्ते | - | परिवर्तितानि भवन्ति |

## अभ्यासः

**1. एकपदेन उत्तरं लिखत-**

क. परेषां किं न समाचरेत् ?

ख. परोपकारः किमर्थम् ?

ग. किं श्रूयताम् ?

घ. मूढैः पाषाणखण्डेषु किं विधीयते ?

ङ. पृथिव्यां कति रत्नानि सन्ति ?

**2. एकवाक्येन उत्तरं लिखत-**

क. सद्भ्यः किं न रोचते ?

ख. चक्रवत् कानि परिवर्तन्ते ?

ग. किं श्रुत्वा अवधार्यताम् ?

घ. किं वृन्दमवसीदति ?

ङ. किम् अहं कामये ?

### 3. पाठमाश्रित्य समुचितपदेन रिक्तस्थानानि पूरयत-

क. सर्वे.................. इच्छन्ति। (महत्त्वम्/मानम्)

ख. त्वहं कामये ............ । (राज्यम्/स्वर्गम्)

ग. आत्मन: ................. न परेषां समाचरेत्। (प्रतिकूलानि/अनुकूलानि)

घ. अष्टादशपुराणेषु व्यासस्य ................ । (वचनत्रयम्/वचनद्वयम्)

ङ. धर्म: स नो यत्र न ............... अस्ति। (असत्यम्/सत्यम्)

### 4. समुचितमेलनं कार्यम्-

| (अ) | (ब) |
|---|---|
| वचनद्वयम् | मत्सरग्रस्ता: |
| न सा सभा | अपहता: |
| पाषाणखण्डेषु | रत्नसंज्ञा विधीयते |
| अबोधा: | न सन्ति वृद्धा: |
| बोद्धार: | व्यासस्य |

### 5. सन्धिविच्छेदं कुरुत-

| | | |
|---|---|---|
| दुर्निवारम् | अबोधोऽपहता: | एवावधार्यताम् |
| अद्यापि | यच्छलेन | पुनर्भवम् |

### 6. सुभाषितं पूरयत-

क. पृथिव्यां ................ विधीयते।

ख. न सा सभा ..................अनुविद्धम्।

ग. अष्टादश ................... परपीडनम्।

### 7. धातुलकारवचनानि लिखत-

रोचन्ते

परिवर्तन्ते

समाचरेत्

कामये

### 8. मूलशब्दं विभक्तिवचने च लिखत-

वृन्द:

सभा

प्रभव:

रत्नम्

स्तुति:

### 9. अन्वयं लिखत-

क. न त्वहं ............................ नाशनम्।

ख. अष्टादशपुराणेषु ................... परपीडनम्।

ग. सुखम् .................... सुखानि च।

### 10. समासविग्रहं कुरुत-

पाषाणखण्डेषु

मत्सरग्रस्ता:

दु:खतप्तानां

अष्टादशपुराणेषु

धर्मसर्वस्वम्

### योग्यताविस्तार:-

- सुभाषितानां सस्वरगायनस्य अभ्यास: कार्य:।
- देशभक्तिपरकानां सुभाषितानां सङ्ग्रहं कुरुत।
- सुभाषितसङ्ग्रहग्रन्थानां सूची निर्मातव्या।

❖ ❖ ❖

## विंशः पाठः

# शिवभूषणयोः संवादः

शिवराजविजयनामकग्रन्थोऽयं पं.अम्बिकादत्तव्यासस्य प्रसिद्धः संस्कृतोपन्यासः अस्ति। अस्मिन् उपन्यासे शिवराजस्य देशभक्तिं शौर्यं चातुर्यं कूटनीतिज्ञतां, चारित्र्यगुणान् च वर्णयन् लेखकः भारतीयसंस्कृतेः औदार्यं स्थापयति। अतः अयं ग्रन्थः न केवलं काव्यात्मकवैचित्र्येण सूक्ष्ममनोहारिवर्णनेन तथा भाषा सौन्दर्येण, कथोपकथनचातुर्येण च सम्यक्तया परिपूर्णः परञ्चात्र स्वदेशाभिमानः, देशसंस्कृतिरक्षा, त्यागस्य बलिदानस्य च भावनोत्कर्षः अस्माकं कृते प्रेरकः अस्ति। अयं सुविशेषः मणिकाञ्चनसंयोगः भाति। अत्र अस्मिन् पाठे भूषण-कवेः शिवराजस्य च प्रत्यक्षसमागमस्य प्रसङ्गः उद्धृतः। एवं राष्ट्रकवेः भूषणस्य देशभक्तशिवराजस्य च संवादः पठनीयः वर्तते। एतयोः सङ्गमः भारतवर्षस्य ज्ञानदेविसरस्वत्या सह दुष्टदमनकारिणीतुलजाभवान्याः सङ्गमः ऐतिहासिकमहत्त्वं प्राप्नोतीत्यलम्।

एकदा रजन्यां सिंहदुर्गाविदूर एव सुकोमलशादायां कलितप्रासादायां भुवि निष्कृपकृपाणपाणिः कञ्चुकाच्छादितकठिनकवचः कलिनसैनिकभटवेशः श्रीशिववीरो गुप्तवेषेण परितः पर्यटन् दुग्धधारयेव क्षालितैर्ज्योत्सनया प्रकाशितैः पथिमिरासन्नात् शिवमान्दिरात् आरात् आजगाम। यत्र च द्वारि रेणुरुषितरोमकुहरम् उत्थाय-उत्थाय पृष्ठमुत्क्रम्य ग्रीवां उद्धूय पौनः पुन्येन पतित्वा भुवि विलुण्ठन्तं कश्चन अश्वम् अद्राक्षीत्।

कस्यायं कुतोऽयमिति मनसि विचिन्वंश्च समीपमागत्य स्वेदाक्लिन्नं च अवलोक्य 'दूरतः कश्चन समायातोऽस्ति तद् भृत्य एव अयम् इति' निश्चित्य शनैः अप्राक्षीत्। 'कस्य अयम् अश्वः' इति। स तु स्व कार्यसंलग्नः अन्यमनस्क एव 'समायातः कोऽपि' इत्युदतरत्। पुनरपि कुतः आगता यूयम् इति पृच्छति शिववीरे च किमिव निदर्थं प्रश्नानुट्टङ्कयसि। आलपितुम् इच्छसि चेद् घटिकायुगलमतिवाह्य समायास्यसि। पूरितजठरपिटकं त्वया सह वार्ताभिरध्वपरिश्रममल्पयिष्यामि। तदाकर्ण्य अन्तर्विहसन्निव शिववीरः 'तथा करिष्याव:'। किन्तु कथय तावत् कुत आगता यूयमिति सकोपमवादीत्। कुत आगता यूयम् ? कुत आगता यूयमिति कुतः कारैः स्फोटितौ मे कर्णौ।

वयं दिल्लीतः आगता, दिल्लीतो, दिल्लीतो, दिल्लीतः।

कथय, किं गजं ददासि घोटकं वा ?

तदाकर्ण्य शिववीरस्तत्प्रतिकृतिं परिज्ञाय शनैः शनैः परिवृत्य मन्दिरस्य पश्चिमदेशे पर्य्यटितुमारेभे।

कोऽयं, कतोऽयं, चरो वा सन्देशहरो वा, कपटपथिको वा, अस्मत्पक्षपाती वा, शत्रुपदातिर्वा कोऽपि उभयपक्षोदासीनो वा इति सद्य एव विज्ञेयम् इति विचारयन् मन्दिरपाश्चात्य प्राचीर गवाक्षादायान्तं कश्चिदस्पष्टालापध्वनिमप्रतिध्वनिमश्रौषीत्। क्षणं विरम्य च गवाक्षसमीपमागत्य ध्वनिप्रतिध्वनिभिरव्यक्तांशबहुलामप्येवमुक्तिं निश्चियेन यत् चिराय दिल्लीवल्लभपाणिपल्लवतल्लजच्छायामध्युषितोऽस्मि। परं न वयम् कवयः कस्यापि राजत्वं वीरत्वं वा प्रतापित्वं वा आढ्यत्वं वा अपेक्षामहे।

न वा कस्यापि साभिमानभूभङ्गमुत्तुङ्गकोपाञ्चिडरवर्षवर्ततां वा सहामहे न तस्य तादृशं भूवलये राज्यं यादृशमस्माकं सारस्वतसृपदौ। न तस्य क्रीतदासा अपि तदीहासमकालमेव बद्धकरसम्पुटा यथोचितावस्थानाः पुरतोऽवतिष्ठन्ते यथास्माकं पदानि,वाक्यानि, छन्दां अलङ्काराः, रीतयः गुणाः, रसाश्च।

स दीवार समारम्भैरपि न तथा पदांस्तोषयितुमलं यथा वयं केवलं वचनभङ्गीभिरेव कारयामः।

अस्मत्शृङ्गाररसरसायनकमास्वाद्य जितरागद्वेषो मुनिरपि प्रतीपदर्शिनीमनुकूलभितुमाकुलः कल्पेत।

अस्मद् वैराग्यकविताम् आकर्ण्य रागोऽपि विरज्येत्।

अस्मद् वीररसकवितां चाकलय्य म्रियमाणोऽपि युद्धाय उतिष्ठेत्।

न वयं मीनानिव पीनान्, इमानिव तुन्दिलान्, भेकानिव निर्विवेकान्, वृषभदंशकानिवकपटाहिंसकान्, काकानिवास्वादितदुर्विपाकान वलीमुखानिव चञ्चलमुखान्, श्रृगालानिवकलितधूर्ततामालान्, द्विजिह्वानिव च द्विजिह्वान्, विद्याशून्यान्, गुर्णिगणग्रहणासमर्थान्, मद्यकीटान् द्यूताननन्यभक्तान्, नृपम्भन्यान् स्वप्नेऽपि समुपास्महे।

दिल्लीश्वरपदविडम्बनमपि चाहं तादृशेषु एव अन्यतमम् अवगत्य क्षणेनैव तत्सम्बन्धसूत्रं त्रोटयित्वा कमपि वीरम् अन्विष्यन् दक्षिणां दिशं प्रस्थितोऽस्मि। शिववीरस्य कीर्तिं श्रावं-श्रावं कर्णयोराकृष्ट इव समायातोऽस्मि।

द्रक्ष्यामि किंभावि।

इति वक्तारं कमपि कविं व्यक्तदिल्लीशद्वारं निजं दिदृशुम् अत्र आगतम् उरीकृत्य, पुनः परिक्रम्य, द्वारमार्गेण मन्दिरम् प्रविश्य, शिवम् प्रणम्य, घण्टामाहत्य, बिल्वदलमुत्थाप्य नैत्रयोः संस्पृश्य शिखायां संस्थाप्य मृत्तिकाशरावस्थं भस्मालिके विलिप्य, प्रदक्षिणच्छलेन, तेनालपन्तं शिवमान्दिराध्यक्षम् प्रणम्य, बद्धाञ्जलिरागन्तुकमपि-कुतः श्रीमान् ? कः श्रीमान् ? इति सादरं समपृच्छत्।

मन्दिराध्यक्षस्तु स्वरेण आकृत्या च तत्र परिचिन्वन्नपि तन्नियमं संस्मृत्य न न तथाऽचेष्टत यथा स विज्ञातः स्यादपरैः। शिववीरस्तु तेन सह चिरमालप्य, तस्य वृत्तान्तमवस्थां प्रकृतिं च अवगत्य चिराय श्रुतं च भूषणकविः इति अभिधानं च उररीकृत्य। श्वो दृष्टा भवान् शिवराजम् ! इति अभिधाय न्यवर्तित्।

निवर्तमानश्च तेनापि को भवान् ? इति पृष्ठः एतद्देशीयः कोऽपि वीरोऽस्मि इति उक्तवान्।

प्रातरेव नित्यनियमनिर्वर्त्य स्वेष्टजनसहितः सभासंस्थ एवं स्वभृत्येन भूषणकविमाकारयत्।

स तु बद्धमहोष्णाीष: पादाग्रपर्यन्तविलम्बमानकञ्चुक: नारिकेलफलसारसहितं यज्ञोपवीतयुगलं हस्ते आदधान: द्वारपालदर्शितेन यथा सभां प्रविश्य विजयतां महाराज स्वरेणोच्चैरूच्चार्य स्वोपहारं महाराजहस्ते आर्पयत्। निर्दिष्टस्थानम् उपविश्य स च एवायं पूर्वदृष्टो वीर इति निरीक्ष्य अहो ! वीरो वीरो वीर: । वीरमेवान्विष्यन दिल्लीत इतो यावत् समायातोऽस्मि, वीरमेव च प्राप्तवानस्मि विजयतां धर्मोद्धारणधीरो, सपलोसारणसमीरो, वीरो महाराज: । इत्युदीर्य किञ्चित् स्मर्यमानस्य महाराजस्य मुखमवलोकयस्तत्प्रशंसायां वीररसमयीं कवितामेकाम् अपठत्। महाराजस्तु ! साधु ! साधु ! इति व्याहृत्य, पुन: पठितुम् आज्ञप्तवान्। पठितवति तस्मिन् सर्वेषु प्रसन्नेषु पुनरप्यादिशत्।

इत्येवं विंशतिवारं तेन सह ब्रजभाषामयीं कवित्वकाम् अनामिका वृत्तिरपाठि।

महाराजेन च तस्मै गजानां विंशतिर्वितीर्णा इत्यद्यारपि कवितारसिकानां मण्डले।

तदेव च दिनमारभ्य तेन भूषणकवि: स्वसभायां संस्थापित: ।

## शब्दार्थ:

| | | |
|---|---|---|
| भटवेश: | - | सैनिकवेश: |
| आसन्नात् | - | समीपम् |
| अप्राक्षीत् | - | पृष्ट्वा |
| अनुटङ्कयसि | - | वारं वारं पृच्छसि |
| पूरितजठरपिटकं | - | उदरभरणम् |
| घोटक: | - | अश्व: |
| गवाक्ष: | - | वातायनम् |
| समुपास्महे | - | सेवां कुर्म: |
| दिदृक्षुं | - | द्रष्टुम् |
| घण्टामाहत्य | - | घण्टां वादयित्वा |
| प्रदक्षिणच्छलेन | - | प्रदक्षिणव्याजेन |
| परिचिन्वन्नपि | - | परिजानन्नपि |
| चिरमालप्य | - | बहुकालपर्यन्तं वार्तालापं कृत्वा |
| अकारयत् | - | आहूतवान् |
| निष्कृपकृपाणपाणि: | - | निष्ठुरतया हस्ते कृपाणं धृत्वा |
| रेणुरूषितरोमकुहरम् | - | धूलिरंजितरोमकूपम् |
| उद्धूय | - | उड्डाप्य |
| स्वेदाक्लिन्नम् | - | स्वेदार्द्रम् |

## अभ्यासः

1. **एकपदेन संस्कृतभाषया उत्तरं लिखत-**

क. शिववीरः रेणुरूषितं कं दृष्टवान् ?

ख. दिल्लीतः कः आगतः ?

ग. कवेः किं नाम ?

घ. कतिवारं कविताम् अपाठि ?

ङ. महाराजहस्ते किम् आर्पयन् ?

च. वैराग्यकविताम् आकर्ण्य कः विरज्येत् ?

छ. स्वेदाक्लिन्नः कः आसीत् ?

ज. कस्मिन् देशे शिववीरः पर्यीषितुमारेभे ?

झ. केन सह शिववीरः चिरमालापितवान् ?

2. **पूर्णवाक्येन उत्तरं लिखत-**

क. कस्य कीर्तिं श्रुत्वा भूषणकविः समायातः ?

ख. शिववीरः मन्दिरं प्रविश्य किं कृतवान् ?

ग. भूषणकवेः वेशभूषा कीदृशी आसीत् ?

3. **पाठमाश्रित्य समुचितपदेन रिक्तस्थानानि पूरयत-**

क. कथय किं .............. ददासि ............. वा।

ख. न वयं .............. पीनान् नृपम्मन्यान् समुपास्महे।

ग. कुतः श्रीमान् कः श्रीमान् इति ................. समपृच्छत्।

घ. महाराजस्तु साधु ! इति व्याहृत्य पुनः .................. आज्ञप्तवान्।

ङ. तेन भूषणकविः स्वसभायां ...................।

4. **सन्धिविच्छेदं कुरुत-**

| | | |
|---|---|---|
| क. | शिववीरस्तत्प्रतिकृतिम् | मन्दिराध्यक्षस्तु |
| ख. | पुनरपि | वीरमेवान्विष्यन् |
| ग. | स्वेष्टजनसहितः | इत्युदीर्य |
| घ. | स्वरेणोच्चैरूच्चार्य | इत्यद्यापि |

5. **त्रिंशत् पदैः पाठमाश्रित्य उत्तरत-**

क. कवयः कथं भवन्ति।

ख. शिववीरस्य सद्गुणानां वर्णनं कुरुत।

ग. दिल्लीश्वरः कीदृशः आसीत्।

घ. शिवार्चनस्य क्रमं लिखत।

ङ. काव्यं किं करोति।

**6. धातुप्रत्ययौ लिखत-**

| पदानि | धातुः | प्रत्ययः |
|---|---|---|
| पर्यटन् | ............ | ............. |
| आगत्य | ............ | ............. |
| पतित्वा | ............ | ............. |
| आगता | ............ | ............. |
| आकर्ण्य | ............ | ............. |

**7. शब्दानाम् अर्थैः सह मेलनं कार्यम्-**

| (अ) | (ब) |
|---|---|
| भूषणः | नृपः |
| रजनी | अश्वः |
| भटः | रात्रिः |
| घोटकः | कविः |
| शिववीरः | सैनिकः |

**योग्यताविस्तारः-**

- भूषणशिवराजयोः वार्तालापस्य अभिनयः करणीयः।
- शिववीरमधिकृत्य प्रणितानां काव्यानां नामानि लिखत।
- शिवचरितस्य प्रमुखानां घटनानां उल्लेखः करणीयः।

## एकविंशः पाठः

# सूक्तयः

सूक्तिः संस्कृतवाङ्मयं च वस्तुतः परस्परं पर्याये स्तः संस्कृतसाहित्यं सूक्तिभिः परिपूर्णं वर्तते। वस्तुतः सूक्तयः जीवन्मन्त्राः सन्ति। सूक्तिषु स्वल्पाक्षरैः गूढं गम्भीरं प्रभूतं च सदाचारतत्त्वं व्यज्यते। येषां जीवने समयस्वल्पता पीडयति, ते सूक्तिभिः स्वल्पकालेनैव ज्ञानसम्पन्नाः भवितुमर्हन्ति। सूक्तयः सरलाः भवन्ति। तत्र क्लिष्टता नाम न विद्यते। एताः सूक्तयः अध्ययने अध्यापने च, सुबोधाः भवन्ति। अल्पायासेन तत्त्वबोधाय सूक्तीनाम् अनुपमं योगदानं वरीवर्तते। अल्पायासेनैव कण्ठस्थाः हृदयस्थाश्च सूक्तयः भवन्ति, प्रवचने, संवादे च सुसहायिकाः सन्ति न केवलं दार्शनिकदृष्ट्या अपितु लोकरसदृष्ट्या च। यथा कालिदासस्य एषा सूक्तिःरिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय।

अतः एताः विशेषतः पठनीयाः स्मरणीयाः हृदयग्राहयाश्च स्वयमेव भवन्ति।

1. बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः।
2. आर्तत्राणाय वः शस्त्रम्।
3. सर्वः खलु कान्तमात्मानं पश्यति।
4. हंसो हि क्षीरमादत्ते तन्मिश्राः वर्जयत्यपः।
5. जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।
6. विक्रमार्जितराज्यस्य स्वयमेव मृगेन्द्रता।
7. क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे।
8. यस्तु क्रियावान् पुरुषः स विद्वान्।
9. यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।
10. व्याख्यानतो विशेषप्रतिपत्तिः न हि सन्देहाद् अलक्षणम्।
11. गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः।
12. एषः क्रीडति कूपयन्त्रघटिका न्यायप्रसक्तोविधिः।
13. याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा।

14 . व्रजन्ति ते मूढधिय: पराभवं भवन्ति मायाविषु ये न मायिन: ।

15 . अति स्नेह: पापशङ्की ।

16 . अनर्थ: परदारव्यवहार: ।

17 . परिहासविजल्पितं सखे परमार्थेन न ग्रह्यतां वच: ।

18 . शठेशाठ्यं समाचेरत् ।

## शब्दार्थ:

| | | |
|---|---|---|
| बलवदपि | - | बलवान् परिपुष्ट: अपि |
| अप्रत्ययम् | - | अविश्वसनीयम् |
| व: | - | भवताम् |
| त्राणाय | - | रक्षणार्थं |
| क्षीरम् | - | दुग्धम् |
| वर्जयति | - | निवारयति |
| आप: | - | जलम् |
| गरीयसी | - | महत्त्वशालिनी |
| प्रतिपत्ति: | - | प्राप्ति: |
| दैन्यम् | - | दीनता |
| मोघा | - | व्यर्थम् |
| याच्ञा | - | याचना |
| लब्धकामा: | - | यस्य कामना पूर्णा |
| व्रजन्ति | - | प्राप्नुवन्ति, गच्छन्ति |
| मूढधिय: | - | मूर्खा: |
| मायाविषु | - | कपटजनेषु |
| अनार्य: | - | असभ्य: |
| परदारा: | - | परस्त्री |
| विजल्पितम् | - | अविचारपूर्वकं कथितम् |

## अभ्यासः

1. **एकपदेन उत्तरं लिखत-**

क. सर्वः खलु आत्मानं कथं पश्यति ?

ख. हंसः किं वर्जयति ?

ग. क्रियावान् पुरुषः कीदृशः भवति ?

घ. अनर्थः कः व्यवहारः?

2. **एकवाक्येन उत्तरं लिखत-**

क. शस्त्रं किमर्थं भवति ?

ख. का स्वर्गादपि गरीयसी ?

ग. महतां क्रियासिद्धिः कुत्र भवति ?

घ. शठे किं समाचरेत् ?

ङ. कः पापशङ्की ?

3. **रिक्तस्थानानि उचितं शब्दं चित्वा पूरयत-**

क. ..................... शिक्षितानामात्यन्यप्रत्ययं चेतः।

ख. जननी जन्मभूमिश्च ..................गरीयसी।

ग. क्रियासिद्धिः सत्त्वे भवति महतां .....................।

घ. यद् यदाचरति .................... तत्तदेवेतरो जनः।

ङ. याच्ञा मोघा .................. नाधमे लब्धकामाः।

4. **समानार्थकं शब्दं लिखत-**

| | | |
|---|---|---|
| जननी, | आपः, | कान्तम् |
| वरम्, | स्नेहः, | सखा |

5. **उचितपदमेलनं कुरुत-**

| 'अ' | 'ब' |
|---|---|
| क. आर्तत्राणाय | समाचरेत् |
| ख. शठे शाठ्यं | स विद्वान् |
| ग. अनार्यः | नाधमे लब्धकामा |
| घ. यस्तु क्रियावान् पुरुषः | परदारव्यवहारः |
| ङ. याच्ञा मोघा वरमधिगुणे | वः शस्त्रम् |

6. **अधोलिखितानां पदानां विलोमपदानि पाठात् चित्वा लिखत-**

मूर्खः, जनकः, पुण्यः, आर्यः,

7. **संस्कृत वाक्येषु प्रयोगं कुरुत-**

सर्वः

जननी

विद्वान्

परमार्थेन

8. **शुद्धवाक्यानां समक्षम् 'आम्' अशुद्धवाक्यानां समक्षम् 'न' इति लिखत-**

क. आर्तत्राणाय न शस्त्रम्।

ख. यस्तु क्रियावान् स विद्वान्।

ग. शठे शाठ्यं न समाचरेत्।

घ. स्नेहः खलु पापशङ्की।

ङ. अनार्यः न परदारव्यवहारः।

9. **सन्धिविच्छेदं कुरुत-**

वर्जयत्यपः

तन्मिश्राः

नोपकरणे

नाधमे

मृगेन्द्रता

10. **धातुलकारवचनानि पृथक् पृथक् कुरुत-**

| क्रियापदम् | धातुः | लकारः | वचनम् |
|---|---|---|---|
| पश्यति | | | |
| वर्जयति | | | |
| क्रीडति | | | |
| व्रजन्ति | | | |
| भवन्ति | | | |

**योग्यताविस्तारः-**

- अन्यानि सुभाषितवचनानि सङ्कलनीयानि।
- सुभाषितवचनानां सङ्ग्रहग्रन्थाः लेखनीयाः।
- सूक्तियुक्ताः केचन् श्लोकाः लेखनीयाः।

❖ ❖ ❖